अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातककार्यक्रमः – साङ्ख्ययोगः

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः
बहादुरशाह-जफर-मार्गः
नवदेहली – 110002

Curriculum Development Committee for B.A. Hons. (Sankhya Yoga)

Prof. Sukant Kumar Senapati
Chairperson of the committee and Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, 🖂 sukantsnpt@gmail.com

Prof. Gaurapriya Dash
Convener of the committee and Professor Head, Dept of Sarvadarshan, Shree Sadashiva Campus, Central Sanskrit University, Puri - 752001 🖂 sriji.gp@gmail.com

Dr. Srinivasa Kumar N Acharya
Convenor of the Committee and Asso. Professor and HoD, Dept. of Philosophy, Manipal Academy of Higher Education, Manipal, Karnataka, 🖂 head.philosophy@manipal.edu

विषयसूची

कार्यक्रमस्य परिचयः **1**

कार्यक्रमस्य उद्देश्यानि **2**

कार्यक्रमस्य परिणामाः **3**

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **4**

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **6**

प्रधानपाठ्यक्रमाणां सञ्चयः **7**

गौणपाठ्यक्रमाणां सञ्चयः **8**

प्रथमवर्षः (प्रधानपाठ्यक्रमाः) **9**

प्रथमसत्रार्द्धः (SEMESTER – 1) **10**

प्रधानः पाठ्यक्रमः (Major) 1.1: भारतीयदर्शनानि साङ्ख्ययोगश्च 10

प्रधानः पाठ्यक्रमः (Major) 1.2: साङ्ख्यदर्शनप्रवेशः 12

प्रधानः पाठ्यक्रमः (Major) 1.3: पातञ्जलदर्शनप्रवेशः 14

द्वितीयसत्रार्द्धः (SEMESTER-2) **16**

प्रधानः पाठ्यक्रमः (Major) 1.4: साङ्ख्यतत्त्वसंग्रहः 16

प्रधानः पाठ्यक्रमः (Major) 1.5: प्रमुख-साङ्ख्याचार्याः 18

प्रधानः पाठ्यक्रमः (Major) 1.6: विविधयोगपरिचयः 20

द्वितीयवर्षः (प्रधानपाठ्यक्रमाः) **22**

तृतीयसत्रार्द्धः (SEMESTER – 3) **23**

प्रधानः पाठ्यक्रमः (Major) 2.1: भारतीयदर्शनानि साङ्ख्ययोगश्च 23

प्रधानः पाठ्यक्रमः (Major) 2.2: साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः 25

प्रधानः पाठ्यक्रमः (Major) 2.3: साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम् 27

चतुर्थसत्रार्द्धः (SEMESTER – 4) **29**

प्रधानः पाठ्यक्रमः (Major) 2.4: साङ्ख्ययोगः 29

प्रधानः पाठ्यक्रमः (Major) 2.5: योगजविभूतिविमर्शः 31

प्रधानः पाठ्यक्रमः (Major) 2.6: भगवद्गीतायां साङ्ख्ययोगः 33

तृतीयवर्षः (प्रधानपाठ्यक्रमाः) **35**

पञ्चमसत्रार्द्धः (SEMESTER – 5) **36**

प्रधानः पाठ्यक्रमः (Major) 3.1: कैवल्यविमर्शः 36

प्रधानः पाठ्यक्रमः (Major) 3.2: विवेकज्ञानविस्तारः 46

प्रधानः पाठ्यक्रमः (Major) 3.3: हठयोगप्रवेशः 48

षष्ठसत्रार्द्धः (SEMESTER – 6) 50

प्रधानः पाठ्यक्रमः (Major) 3.4: श्रीमद्भागवते साङ्ख्ययोगः 50

प्रधानः पाठ्यक्रमः (Major) 3.5: उपनिषत्सु साङ्ख्ययोगः 52

प्रधानः पाठ्यक्रमः (Major) 3.6: प्रायोगिकं योगदर्शनम् 54

चतुर्थवर्षः (प्रधानपाठ्यक्रमाः) 56

सप्तमसत्रार्द्धः (SEMESTER – 7) 57

प्रधानः पाठ्यक्रमः (Major) 4.1: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – १ 57

प्रधानः पाठ्यक्रमः (Major) 4.2: शास्त्रान्तरेषु साङ्ख्ययोगदर्शनप्रभावः 59

प्रधानः पाठ्यक्रमः (Major) 4.3: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकध्ययनम् – २ 61

अष्टमसत्रार्द्धः (SEMESTER – 8) 63

प्रधानः पाठ्यक्रमः (Major) 4.4: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – ३ 63

प्रधानः पाठ्यक्रमः (Major) 4.5: साङ्ख्यशास्त्रार्थनिर्णयः 65

प्रधानः पाठ्यक्रमः (Major) 4.6: साङ्ख्ययोगविमर्शः 67

द्वितीयवर्षः (गौणपाठ्यक्रमाः) 69

गौणः पाठ्यक्रमः (Minor) 2.क.1: भारतीयदर्शनानि साङ्ख्ययोगश्च 70

गौणः पाठ्यक्रमः (Minor) 2.क.2: साङ्ख्यदर्शनप्रवेशः 72

गौणः पाठ्यक्रमः (Minor) 2.क.3: पातञ्जलदर्शनप्रवेशः 74

तृतीयवर्षः (गौणपाठ्यक्रमाः) 76

गौणः पाठ्यक्रमः (Minor) 3.क.1: साङ्ख्यतत्त्वसंग्रहः 77

गौणः पाठ्यक्रमः (Minor) 3.क.2: प्रमुख-साङ्ख्याचार्याः 79

गौणः पाठ्यक्रमः (Minor) 3.क.3: विविधयोगपरिचयः 81

गौणः पाठ्यक्रमः (Minor) 3.क.4: साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः 83

गौणः पाठ्यक्रमः (Minor) 3.क.5: साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम् 85

गौणः पाठ्यक्रमः (Minor) 3.क.6: साङ्ख्ययोगः 87

गौणः पाठ्यक्रमः (Minor) 3.क.7: योगजविभूतिविमर्शः 89

गौणः पाठ्यक्रमः (Minor) 3.क.8: भगवद्गीतायां साङ्ख्ययोगः 91

चतुर्थवर्षः (गौणपाठ्यक्रमाः).. 93

गौणः पाठ्यक्रमः (Minor) 4.क.1: विवेकज्ञानविस्तारः 94

गौणः पाठ्यक्रमः (Minor) 4.क.2: हठयोगप्रवेशः 96

गौणः पाठ्यक्रमः (Minor) 4.क.3: प्रायोगिकं योगदर्शनम्... 98

कार्यक्रमस्य परिचयः

(Introduction of the Program)

बी.ए. आनर्स् (साङ्ख्ययोगः) चतुर्णां वर्षाणां कार्यक्रमः वर्तते। अस्मिन् कार्यक्रमे आहत्य अष्ट सत्रार्द्धाः भविष्यन्ति।

अर्हता - प्राक्-शास्त्री, उपशास्त्री, उत्तरमध्यमा इति परीक्षायाम् उत्तीर्णाः तत्समकक्ष्यापरीक्षोत्तीर्णाः वा छात्राः एन्.टि.ए. द्वारा आयोज्यमानपरीक्षामाध्यमेन उत्तीर्य अस्मिन् बी.ए.आनर्स् (साङ्ख्ययोगः) कार्यक्रमे प्रवेष्टुं शक्नुवन्ति। अत्र अष्टसु सत्रार्द्धेषु स्वशास्त्रीयविषयाः (Major), स्वशास्त्रसम्बद्धचयनितविषयाः (Minor), बहुशास्त्रीयविषयाः (Multi-disciplinary), नैतिकमूल्याधारितपाठ्यक्रमाः (VAC), कौशलाधारितपाठ्यक्रमाः (SEC) च भविष्यन्ति।

एतैः साकम् अन्तिमसत्रार्द्धे प्रशिक्षुतासेवा (Internship) पाठ्येतरगतिविधयः (ECA) लघुशोधप्रबन्धः (Dissertation) च भविष्यन्ति।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

1. छात्रेभ्यः भारतीयदार्शनिकपरम्परायाः विशेषतः साङ्ख्ययोगदर्शनस्य सम्यग्ज्ञानस्य प्रदानम्।
2. प्रकृतिपुरुषतत्त्वयोः विवेचनद्वारा जगत्-जीवयोः सम्बन्धस्य बोधः।
3. त्रिगुणसिद्धान्तस्य (सत्त्व-रजस्-तमस्) दार्शनिक-मनोवैज्ञानिकमहत्त्वावगमः।
4. साङ्ख्यदर्शने प्रतिपादितस्य तत्त्वविचारस्य योगदर्शनेन सह तादात्म्यस्य तथा व्यावहारिकोपयोगस्य बोधः।
5. प्राचीनज्ञानपरम्परायाः अध्ययनद्वारा आधुनिकजीवनस्य नैतिक-मानसिक-आध्यात्मिकसमस्यासु समाधानमार्गान्वेषणम्।
6. दार्शनिकग्रन्थानां (साङ्ख्यकारिका, योगसूत्रादीनाम्) पठन-व्याख्यान-अनुसन्धानकौशलस्य विकासः।
7. आत्मज्ञान-स्वाध्याय-ध्यानादीनां माध्यमेन अन्तर्मुखदृष्टेः संवर्धनम्।
8. जीवनस्य परमपुरुषार्थानां धर्म-अर्थ-काम-मोक्षाणां समीचीनबोधः।

कार्यक्रमस्य परिणामाः

(Outcomes of the Program)

अस्मिन् पाठ्यक्रमे पञ्जीकृताः छात्राः अत्यावश्यकानां कौशलानां सामर्थ्यानां च पूर्णतया सङ्ग्रहणे प्रशिक्ष्यन्ते। एतानि अधोलिखितलक्ष्याणि संसाधयितुम् अवसरं लप्स्यन्ते -

कार्यक्रमस्य परिणामः – 1	छात्राः साङ्ख्ययोगदर्शनस्य ऐतिहासिकविकासं, प्रमुखाचार्याणां योगदानं च सम्यगवगमिष्यन्ति।
कार्यक्रमस्य परिणामः – 2	छात्राः प्रकृति-पुरुष-महत्तत्त्व-अहङ्कार-तन्मात्रा-इन्द्रियादीनां तत्त्वानां सुव्यवस्थितं दार्शनिकज्ञानं लप्स्यन्ते ।
कार्यक्रमस्य परिणामः – 3	छात्राः साङ्ख्यदर्शनस्य प्रमेय-प्रमाण-तत्त्वमीमांसायाम् आलोचनात्मकदृष्ट्या विचारं कर्तुं समर्थाः भवष्यन्ति।
कार्यक्रमस्य परिणामः – 4	छात्रेषु त्रिगुणसिद्धान्तस्य आधारेण व्यक्तित्व-व्यवहार-मानसिकस्थितीनां विश्लेषणं कर्तुं क्षमता जायते।
कार्यक्रमस्य परिणामः – 5	योगाभ्यासस्य (ध्यान-वैराग्य-अभ्यासादीनाम्) माध्यमेन आत्मसंयमः, मानसिकस्वास्थ्यं, जीवनसन्तुलनं च साधयितुं छात्राः शक्ष्यन्ति।
कार्यक्रमस्य परिणामः – 6	अनुसन्धानाभिमुखदृष्ट्या साङ्ख्ययोगदर्शनस्य अनुप्रयोगम् आधुनिकविषयेषु यथा - मनोविज्ञाने, शिक्षायां, परामर्शे, जीवनदर्शने च कर्तुं समर्था भवष्यन्ति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MAJOR COURSES

Course Name	Rootedness	IKS	Futuristic	Employability	Value, Skill and Multidisciplinary	Disciplinary Knowledge	Difficulty Level
भारतीयदर्शनानि साङ्ख्ययोगश्च	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यदर्शनप्रवेशः	✓	✓	✓	✓	✓	✓	✓
पातञ्जलदर्शनप्रवेशः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यतत्त्वसंग्रहः	✓	✓	✓	✓	✓	✓	✓
प्रमुख-साङ्ख्याचार्याः	✓	✓	✓	✓	✓	✓	✓
विविधयोगपरिचयः	✓	✓	✓	✓	✓	✓	✓
भारतीयदर्शनानि साङ्ख्ययोगश्च	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः)	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
योगजविभूतिविमर्शः	✓	✓	✓	✓	✓	✓	✓
भगवद्गीतायां साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
कैवल्यविमर्शः	✓	✓	✓	✓	✓	✓	✓
विवेकज्ञानविस्तारः	✓	✓	✓	✓	✓	✓	✓
हठयोगप्रवेशः	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भागवते साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
उपनिषत्सु साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
प्रायोगिकं योगदर्शनम्	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – १	✓	✓	✓	✓	✓	✓	✓

शास्त्रान्तरेषु साङ्ख्ययोगदर्शनप्रभावः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकध्ययनम् – २	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – ३	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रार्थनिर्णयः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्ययोगविमर्शः	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MINOR COURSES

Course Name	Rootedness	IKS	Futuristic	Employability	Value, Skill and Multidisciplinary	Disciplinary Knowledge	Difficulty Level
भारतीयदर्शनानि साङ्ख्ययोगश्च	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यदर्शनप्रवेशः	✓	✓	✓	✓	✓	✓	✓
पातञ्जलदर्शनप्रवेशः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यतत्त्वसंग्रहः	✓	✓	✓	✓	✓	✓	✓
प्रमुख-साङ्ख्याचार्याः	✓	✓	✓	✓	✓	✓	✓
विविधयोगपरिचयः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
योगजविभूतिविमर्शः	✓	✓	✓	✓	✓	✓	✓
भगवद्गीतायां साङ्ख्ययोगः	✓	✓	✓	✓	✓	✓	✓
विवेकज्ञानविस्तारः	✓	✓	✓	✓	✓	✓	✓
हठयोगप्रवेशः	✓	✓	✓	✓	✓	✓	✓
प्रायोगिकं योगदर्शनम्	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		प्रधानपाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: भारतीयदर्शनानि साङ्ख्ययोगश्च	4	100-199
2.		प्रधानः 1.2: साङ्ख्यदर्शनप्रवेशः	4	100-199
3.		प्रधानः 1.3: पातञ्जलदर्शनप्रवेशः	4	100-199
4.		प्रधानः 1.4: साङ्ख्यतत्त्वसंग्रहः	4	100-199
5.		प्रधानः 1.5: प्रमुख-साङ्ख्याचार्याः	4	100-199
6.		प्रधानः 1.6: विविधयोगपरिचयः	4	100-199
7.	द्वितीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: भारतीयदर्शनानि साङ्ख्ययोगश्च	4	200-299
8.		प्रधानः 2.2: साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः	4	200-299
9.		प्रधानः 2.3: साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्	4	200-299
10.		प्रधानः 2.4: साङ्ख्ययोगः	4	200-299
11.		प्रधानः 2.5: योगजविभूतिविमर्शः	4	200-299
12.		प्रधानः 2.6: भगवद्गीतायां साङ्ख्ययोगः	4	200-299
13.	तृतीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: कैवल्यविमर्शः	4	300-399
14.		प्रधानः 3.2: विवेकज्ञानविस्तारः	4	300-399
15.		प्रधानः 3.3: हठयोगप्रवेशः	4	300-399
16.		प्रधानः 3.4: श्रीमद्भागवते साङ्ख्ययोगः	4	300-399
17.		प्रधानः 3.5: उपनिषत्सु साङ्ख्ययोगः	4	300-399
18.		प्रधानः 3.6: प्रायोगिकं योगदर्शनम्	4	300-399
19.	चतुर्थवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – १	4	400-499
20.		प्रधानः 4.2: शास्त्रान्तरेषु साङ्ख्ययोगदर्शनप्रभावः	4	400-499
21.		प्रधानः 4.3: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकध्ययनम् – २	4	400-499
22.		प्रधानः 4.4: साङ्ख्यशास्त्रीयं पर्य्यालोचनात्मकमध्ययनम् – ३	4	400-499
23.		प्रधानः 4.5: साङ्ख्यशास्त्रार्थनिर्णयः	4	400-499
24.		प्रधानः 4.6: साङ्ख्ययोगविमर्शः	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	द्वितीयवर्षीयाः गौणपाठ्यक्रमाः	गौणः 2.क.1: भारतीयदर्शनानि साङ्ख्ययोगश्च	4	200-299
2		गौणः 2.क.2: साङ्ख्यदर्शनप्रवेशः	4	200-299
3		गौणः 2.क.3: पातञ्जलदर्शनप्रवेशः	4	200-299
4	तृतीयवर्षीयाः गौणपाठ्यक्रमाः	गौणः 3.क.1: साङ्ख्यतत्त्वसंग्रहः	4	300-399
5		गौणः 3.क.2: प्रमुख-साङ्ख्याचार्याः	4	300-399
6		गौणः 3.क.3: विविधयोगपरिचयः	4	300-399
7		गौणः 3.क.4: साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः	4	300-399
8		गौणः 3.क.5: साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्	4	300-399
9		गौणः 3.क.6: साङ्ख्ययोगः	4	300-399
10		गौणः 3.क.7: योगजविभूतिविमर्शः	4	300-399
11		गौणः 3.क.8: भगवद्गीतायां साङ्ख्ययोगः	4	300-399
12	चतुर्थवर्षीयाः गौणपाठ्यक्रमाः	गौणः 4.क.1: विवेकज्ञानविस्तारः	4	400-499
13		गौणः 4.क.2: हठयोगप्रवेशः	4	400-499
14		गौणः 4.क.3: प्रायोगिकं योगदर्शनम्	4	400-499

प्रथमवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रथमसत्रार्द्धः (SEMESTER – 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: भारतीयदर्शनानि साङ्ख्ययोगश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयदार्शनिकज्ञानपरम्परायाः अधिगमः।
2. वैदिकावैदिकदर्शनानां परिचयप्रदानम्।
3. साङ्ख्ययोगदर्शनस्य स्वरूपवैशिष्ट्ययोः परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयदार्शनिकज्ञानपरम्परायाः गाम्भीर्यं ज्ञातुं समर्थाः भविष्यन्ति।
2. वेदप्रमाणत्वेन वैदिकदर्शनानां तद्भिन्नानां च दर्शनानां तत्त्वं जानीयुः।
3. भारतीयदर्शनेषु साङ्ख्ययोगदर्शनस्य स्वरूपं वैशिष्ट्यञ्च अवगन्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	भारतीयदर्शनानि साङ्ख्ययोगश्च	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयदर्शनानां परिचयः। **श्रेयोऽङ्कः १**

- दर्शनशब्दार्थः।
- भारतीयदर्शनानि तेषां स्वरूपञ्च।
- वैदिकदर्शनानि।
- अवैदिकदर्शनानि।

अन्वितिः २. साङ्ख्यदर्शनस्य स्वरूपम्। **श्रेयोऽङ्कः १**

- साङ्ख्यशब्दार्थः।
- उपनिषत्सु साङ्ख्यम्।
- साङ्ख्यदर्शनस्य प्रमुखा आचार्याः तेषां कृतयश्च।

अन्वितिः ३. योगदर्शनस्य स्वरूपम्। श्रेयोऽङ्कः १

- योगशब्दार्थः।
- वैदिकं योगदर्शनम्।
- योगदर्शनस्य प्रमुखा आचार्याः तेषां कृतयश्च।

अन्वितिः ४. योगदर्शनस्य प्रायोगिकता। श्रेयोऽङ्कः १

- योगदर्शनस्य प्रायोगिकं स्वरूपम्।
- योगदर्शनस्य वैज्ञानिकता।
- साम्प्रतिकसन्दर्भे योगदर्शनस्य उपयोगिता।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. उपाध्याय, बलदेव. भारतीय दर्शन: साङ्ख्य और योग, प्रयागराज: हिंदी साहित्य सम्मेलन।
2. मिश्र, जगदीशचन्द्र. भारतीय दर्शन, वाराणसी: चौखम्बा सुरभारती प्रकाशन।
3. नागसम्पिगे, ए. वी., एवं अडिग, शंकरनारायण, षड्दर्शनसारः, बेंगलुरु: पूर्णप्रज्ञ शोध मन्दिरम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. दासगुप्त, सुरेन्द्र नाथ, भारतीय दर्शन (भाग–1) (अनु. राधाकृष्ण शर्मा), दिल्ली: भारतीय ज्ञानपीठ।
2. त्रिपाठी, शिवदत्त, भारतीय दर्शनों का इतिहास, वाराणसी: चौखम्बा विद्याभवन।
3. नीलकण्ठपति, प्रो., एवं कुलपतिचरः, सामान्यदर्शनम्, पुरी: श्रीजगन्नाथ संस्कृत विश्वविद्यालय।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: साङ्ख्यदर्शनप्रवेशः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यशास्त्रीयप्रवृत्तिविषयकः अधिगमः।
2. साङ्ख्यशास्त्रोक्ततत्त्वानां ज्ञानम्।
3. प्रकृतिपुरुषयोः स्वरूपावबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यदर्शनस्य प्रवर्तने किं बीजमिति ज्ञातुं समर्थाः भविष्यन्ति।
2. साङ्ख्यदर्शने कानि मूलभूतानि तत्त्वानि कथं च पदार्थानां सृष्टिरिति परिज्ञातुम् अर्हाः भवेयुः।
3. प्रकृति-पुरुषयोः स्वरूपबोधेन दुःखनिवृत्तिरूपा लक्ष्यसिद्धिरपि कथं स्यादिति अवगन्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	साङ्ख्यदर्शनप्रवेशः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साङ्ख्यशास्त्रीयं प्रवृत्तिबीजम्। **श्रेयोऽङ्कः १**

- त्रिविधं दुःखम्।
- लौकिकोपायैः त्रिविधदुःखनिवृत्तेरसम्भवत्वम्।
- आनुश्रविकोपायस्य अकिंचित्करवत्वम्।
- दुःखनिवृत्तेः विवेकज्ञानसाध्यत्वम्।

अन्वितिः २. साङ्ख्यशास्त्रीयतत्त्वानि। **श्रेयोऽङ्कः १**

- अव्यक्ततत्त्वम्।
- त्रयोविंशति व्यक्तानि तत्त्वानि।
- सृष्टिप्रक्रिया।

- पुरुषः।

अन्वितिः ३. साङ्ख्यशास्त्रे प्रकृतिः। **श्रेयोऽङ्कः १**

- प्रकृतिपदार्थविवेचनम्।
- प्रकृतेः अस्तित्वे मानम्।
- सत्कार्यवादः।
- प्रकृतिसम्भवाः गुणाः (गुणक्षोभः)

अन्वितिः ४. साङ्ख्यदर्शने पुरुषः। **श्रेयोऽङ्कः १**

- पुरुषस्य अस्तित्वे मानम्।
- अनेकत्वे मानानि।
- नित्यशुद्धादिसत्त्वेऽपि प्रतिसंवेदित्वम्।
- पुरुष-प्रकृतिसंयोगः वियोगश्चः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. ईश्वरकृष्ण, साङ्ख्यकारिका, वाराणसी: चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. सेनापति, सुकान्तकुमार, साङ्ख्यायनम्, पुरी: नव्यव्याकरण विभाग, श्रीसदाशिव परिसर।
2. उपाध्याय, बलदेव, भारतीय दर्शन का इतिहास, वाराणसी: चौखम्बा सुरभारती प्रकाशन।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: पातञ्जलदर्शनप्रवेशः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगशास्त्रीयः प्रवेशः।
2. पातञ्जलदर्शनोक्ततत्त्वानामधिगमः।
3. योगोपायसहितविभूतीनाम् अधिगमद्वारा तद्विषयिण्याः जिज्ञासायाः उपशान्तिः अनुसन्धित्सायाः जागृतिश्च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयज्ञानपरम्परायां योगशास्त्रस्य अत्युत्तमस्थानस्याविष्करणे समर्थाः प्रभवेयुः।
2. पातञ्जलदर्शनसम्बन्धिनि क्षेत्रे शोधकार्यजनितां योग्यतां प्राप्स्यन्ति।
3. शास्त्रावबोधने अर्हतायाः अभिवृद्धिं प्राप्नुयुः।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	पातञ्जलदर्शनप्रवेशः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. योगसामान्यस्वरूपम्। **श्रेयोऽङ्कः १**

- सम्प्रज्ञातयोगः।
- सम्प्रज्ञातयोगस्य साधनानि।
- असम्प्रज्ञातयोगः।
- असम्प्रज्ञातयोगस्य साधनानि।

अन्वितिः २. योगाधिकारिणः तेषां योग-प्रक्रिया च। **श्रेयोऽङ्कः १**

- मन्दाधिकारिणः तेषां योगसाधनानि च (अष्टाङ्गयोगः)
- मध्यमाधिकारिणःतेषां योगोपायाः।
- उत्तमाधिकारिणां योगप्रवृत्तिः।

अन्वितिः ३. विभूतयः। **श्रेयोऽङ्कः १**

- संयमस्वरूपम्।
- प्रमुखसिद्धीनां विवरणम्।
- भुवनज्ञानम्।
- विभूतीनां योगे अन्तरायत्वं साधकत्वं वेति पर्य्यालोचनम्।

अन्वितिः ४. कैवल्यम्। **श्रेयोऽङ्कः १**

- पातञ्जलदर्शने कैवल्यम्।
- योगिनां कर्म।
- निर्विशेषयोगः (निर्विकल्पकः)
- ईश्वरप्रणिधानम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. पातञ्जलि, पातञ्जलयोगसूत्रम् (राजमार्तण्डवृत्तिसहितम्), वाराणसी: चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. दामोदरशास्त्री, श्री, योगतत्त्ववारिधिः, भुवनेश्वर: ओडिशा साहित्य एकाडेमी।
2. परमहंस स्वामी अनन्त भारती, योगदर्शन (योगप्रभाकर भाष्य सहित), दिल्ली: स्वामी केशवानन्द योग संस्थान।
3. मिश्र, बालकृष्ण, पातंजल योगदर्शन (टीका), गोरखपुर: गीताप्रेस।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (SEMESTER-2)

प्रधानः पाठ्यक्रमः (Major) 1.4: साङ्ख्यतत्त्वसंग्रहः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. तत्त्वज्ञानपरिच्छितिः।
2. भारतीयदर्शनेषु साङ्ख्यशास्त्रस्य वैशिष्ट्यावगाहनम्।
3. भारतीय भौतिकविज्ञानेन साङ्ख्यशास्त्रीयसमीक्षणस्य अन्तःस्रोतसः आविष्करणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यशास्त्रीयतत्त्वविषयपरिज्ञानेन तत्र अनुसन्धानविषययोग्यतायाः संग्रहः।
2. महर्षिकपिलासुरिप्रमुखानां दिव्यज्ञानस्य अनुसन्धानं प्राचीनपद्धतेश्च प्रक्रिया-विज्ञप्तिः।
3. वैश्वविज्ञानमपि भारतीयज्ञानपरम्परया प्रभावितमिति दिशः उन्मोचनेन तद्विषण्या आगामिन्याः प्रवृत्तेरुत्पत्तिः।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	साङ्ख्यतत्त्वसंग्रहः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रकृतिविचारः। **श्रेयोऽङ्कः १**

- मूलप्रकृतिनिरूपणम्।
- महतत्त्वविचारः।
- अहङ्कारविवृतिः।
- पञ्चतन्मात्राणि।

अन्वितिः २. सर्गविचारः। **श्रेयोऽङ्कः १**

- सांख्योक्त सर्गविवरणम्।
- गुणवैषम्यनिरूपणम्।

- साङ्ख्यनये कार्यकारणवादः।
- प्रतिसञ्चरः।

अन्वितिः ३. प्रत्ययसर्गविचारः। **श्रेयोऽङ्कः १**

- विपर्ययनिरूपणम्।
- अशक्तिविचारः।
- तुष्टिविवरणम्।
- सिद्धिविमर्शः।

अन्वितिः ४. बन्धमोक्षविचारः। **श्रेयोऽङ्कः १**

- बन्धस्वरूपम् ।
- बन्धने कारणम्।
- त्रिविधः बन्धः।
- बन्धविमुक्तिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विज्ञानभिक्षु, तत्त्वसमाससूत्रम् (भावागणेशकृत तत्त्वयाथार्थ्यदीपनटीका सहित), वाराणसी : भारतीय विद्या प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. साङ्ख्यकारिका, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
2. महामहोपाध्याय दामोदरशास्त्री, साङ्ख्यतत्त्वदीपिका, भुवनेश्वर : ओडिशा साहित्य एकाडेमी।
3. पाण्डेय, डॉ. कमलेश, साङ्ख्यदर्शन का तत्त्वचिन्तन, वाराणसी : विश्वविद्यालय प्रकाशन।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: प्रमुख-साङ्ख्याचार्याः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पूर्वाचार्याणां पतञ्जलिप्रमुखाणाम् ऋषीणां चिन्तनस्तरस्य कृतिविषयस्य च चाधिगतिः।
2. भारतीयबुद्धिजीविनां प्रचारः।
3. महतां चिन्तनेन स्वाभाविकरीत्या कोमलस्तरेऽपि व्यक्तित्व-परिवर्द्धनम् ।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पूर्वाचार्याणां व्यक्तित्वज्ञानेन आत्मव्यक्तित्ववर्द्धनात्मिकायाः प्रतिपुष्टेः सम्प्राप्तिः स्यात्।
2. आचार्याणां कृतीनां लोकार्पणाय प्रकृतेरूपलब्धिः सम्भवेत्।
3. शास्त्रध्ययनार्थं आत्मप्रस्तुतिलाभः भवेत्।
4. पूर्वाचार्याणां विज्ञानसम्मतस्य सिद्धान्तस्य अनुसन्धित्सा, संस्तुतिः तत्र प्रवृत्तिश्च सम्भवेत्।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	प्रमुख-साङ्ख्याचार्याः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्राचीनसाङ्ख्यचार्याः। **श्रेयोऽङ्कः १**

- भगवान् कपिलः।
- आसुरिः।
- जैगीषव्यः (आवट्यः)
- देवलः।
- वार्षगण्यः।
- ईश्वरकृष्णः।

अन्वितिः २. ईश्वरकृष्णात् परवर्तिनः साङ्ख्याचार्याः। **श्रेयोऽङ्कः १**

- विन्ध्यवासी।
- माठरः।
- गौडपादः।
- वाचस्पतिमिश्रः।

अन्वितिः ३. आधुनिकसाङ्ख्याचार्याः। **श्रेयोऽङ्कः १**

- अनिरुद्धः।
- महादेववेदान्ती।
- विज्ञानभिक्षुः।
- भावागणेशः।

अन्वितिः ४. आधुनिकसाङ्ख्यदर्शनस्य रूपरेखम्। **श्रेयोऽङ्कः १**

- आस्तिकदर्शनानां संगतिः।
- परवादनिरसनपक्षः।
- साङ्ख्य-योग-वेदान्तानाम् एकवाक्यता।
- ईश्वरसिद्धेः निरपेक्षव्याख्या।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. डॉ. सत्यव्रत शर्मा, साङ्ख्यदर्शन का विकास, दिल्ली : सस्ता साहित्य मंडल।
2. बलदेव उपाध्याय, भारतीय दर्शन का इतिहास, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. ईश्वर नन्दन झा, साङ्ख्यदर्शन, आगरा : केन्द्रीय हिन्दी संस्थान।
2. डॉ. उमाकान्त मिश्र, भारतीय दर्शन में साङ्ख्य परंपरा, दिल्ली : ओम् पब्लिकेशन्स।
3. Keith, A. B., The Samkhya system: A history of the Samkhya philosophy. Oxford University Press.

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: विविधयोगपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विविधयोगसिद्धान्तानाम् अधिगतिः।
2. भारतीयदर्शनेषु योगशास्त्रस्य व्यापकत्वपरिज्ञानम्।
3. योगशास्त्रीयसिद्धान्तानां नैकशास्त्रीयसंगतिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विविधयोगशास्त्रीयसिद्धान्तानामधिगत्या आत्मोत्कर्षसाधनं सम्भवेत्।
2. योगशास्त्रस्य नैकशास्त्रैः एकवाक्यतायाः अधिगत्या तत्र कोमलमतीनाम् अध्येतॄणामभिरुच्युत्पादनं भविष्यति।
3. योगशास्त्रीयरहस्यस्योद्घाटनेन सनातनज्ञानसंवाहिन्याः संस्तुतिः तत्र प्रवृतिश्च जायेत।
4. स्वाभिरुचिमनुसृत्य जीवनयापनशैल्यां योगस्य संयोगीकरणं भविता।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	विविधयोगपरिचयः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. राजयोगः। **श्रेयोऽङ्कः १**

- राजयोगस्य स्वरूपम्।
- राजयोगस्य साधनम्।
- राजयोगस्य प्राप्तिः।

अन्वितिः २. हठयोगः। **श्रेयोऽङ्कः १**

- हठयोगस्य स्वरूपम्।
- हठयोगस्य साधनम् ।
- हठयोगस्य प्राप्तिः ।

अन्वितिः ३. ज्ञानयोगः भक्तियोगश्च। **श्रेयोऽङ्कः १**

- ज्ञानयोगस्य स्वरूपम्।
- ज्ञानयोगस्य साधनानि।
- ज्ञानयोगस्य अधिगतिः।
- भक्तियोगः तत्साधनानि च गीतोक्त भक्तियोगश्च।

अन्वितिः ४. कर्मयोगः। **श्रेयोऽङ्कः १**

- कर्मयोगसाधनम्।
- संप्राप्तिः।
- गीतोक्तकर्मयोगः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. महर्षि पतञ्जलि, योगसूत्रम्, वाराणसी : चौखम्बा प्रकाशन।
2. स्वात्मारामयोगीन्द्र, हठयोगप्रदीपिका, वाराणसी : भारतीय विद्या संस्थान।
3. गौराङ्गः दर्शन दास, श्रीमद्भगवद्गीता (सुबोधिनी सहिता), ISKCON प्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. उत्तराखण्ड मुक्त विश्वविद्यालय, योग परिचय।
2. कुमारी राज पाण्डेय, भारतीय योग परम्परा के विविध आयाम। दिल्ली : राधा पब्लिकेशन।
3. जगदीश चन्द्र मिश्र, भारतीय दर्शन, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
4. विज्ञानानन्द सरस्वती, योग विज्ञान, ऋषिकेश : योग निकेतन।

द्वितीयवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

तृतीयसत्रार्द्धः (SEMESTER – 3)

प्रधानः पाठ्यक्रमः (Major) 2.1: भारतीयदर्शनानि साङ्ख्ययोगश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. विश्वस्तरे योगस्य प्रचारः।
2. भारतीयज्ञानसंम्वाहिन्यां योगशास्त्रीयविचाराणां योगदानस्य अधिगमः।
3. वैज्ञानिकपद्धत्या योगशास्त्रस्य स्वतन्त्रमूल्यायनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. योगशास्त्रीयविषयाणां वैज्ञानिकतायाः अध्येतृषु बोधः भवेत्।
2. योगशास्त्रस्य सर्वशास्त्रीय – आन्तःस्रोतसः भावं छात्रः अवगच्छेत्।
3. सरहस्यं योगसिद्धान्ताः पाठकैः अधिगम्येरन्।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	भारतीयदर्शनानि साङ्ख्ययोगश्च	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. योगानुशासनं वृत्तिनिरोधश्च। **श्रेयोऽङ्कः १**

- चित्तभूमयः।
- पुरुषश्च वृत्तेः सारूप्यम्।
- द्रष्टुः स्वरूपम्।
- अभ्यास-वैराग्ये।

अन्वितिः २. सम्प्रज्ञातयोगः। **श्रेयोऽङ्कः १**

- सम्प्रज्ञातस्य योगस्य लक्षणम् ।
- वितर्कानुगतः सम्प्रज्ञातः।
- विचारानुगतः सम्प्रज्ञातः

- आनन्दानुगतः सम्प्रज्ञातः।
- अस्मितानुगतः सम्प्रज्ञातः।

अन्वितिः ३. असम्प्रज्ञातयोगः। **श्रेयोऽङ्कः १**

- असम्प्रज्ञातस्य लक्षणं स्वरूपं च।
- असम्प्रज्ञातयोगस्य भेदाः।
- असम्प्रज्ञातयोगस्य दृष्टादृष्टफलम्।
- सर्ववृत्तिनिरोधात्मकः असम्प्रज्ञातः।

अन्वितिः ४. समापत्तिः। **श्रेयोऽङ्कः १**

- ग्रहितृसमापत्तिः।
- ग्राह्य समापत्तिः।
- ग्रहणसमापत्तिः।
- सबीज-निर्बीजसमाधिभेदः।

निर्धारिता: ग्रन्थाः (Essential/Recommended Readings/Texts)

1. डॉ. नगेन्द्र, योगदर्शनविवेचनम् (मूलसूत्र, भाष्य एवं अनुवाद), नई दिल्ली : मोररजी देसाई नेशनल इंस्टिट्यूट ऑफ योग।
2. अनाम लेखक, व्यासभाष्योपेतं पातञ्जलयोगदर्शनम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. विज्ञानभिक्षु, योगसारसंग्रहः (व्याख्या: डॉ. पवन कुमारी), दिल्ली : इस्टर्न बुक लिंकर्स।
2. डॉ. कैलाश चन्द्र मिश्र, भारतीय दर्शन में योग, प्रयागराज : लोकभारती प्रकाशन।
3. डॉ. प्रभाकर मिश्र, योग दर्शनः तुलनात्मक अध्ययन, वाराणसी : विद्या भवन प्रकाशन।

काठिन्यस्तरः 200-299	**श्रेयोऽङ्काः - 4 होराः - 60**

प्रधानः पाठ्यक्रमः (Major) 2.2: साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यशास्त्रीयाधिगतिः।
2. भारतीयज्ञानपरम्परायां साङ्ख्यदर्शनस्य स्वतन्त्रस्थानस्याविष्करणम्।
3. साङ्ख्यशास्त्रीयसिद्धान्तानाम् अधिगमेन अन्यदर्शनापेक्षया तस्य वैशिष्ट्यावगतिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यशास्त्रे छात्राणामभिरुच्युत्पादनं जायेत।
2. साङ्ख्यशास्त्रीयसिद्धान्तानां सम्यग्ज्ञानेन जिज्ञासूनां तत्र अग्रिमशोधकार्यसम्बन्धिनी प्रवृत्तिलाभः सम्भवेत्।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	साङ्ख्यशास्त्रीयप्रमुखसिद्धान्ताः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. दृष्टानुश्रविकोपायाभ्यां दुःखनिवृत्तेरभावः। **श्रेयोऽङ्कः १**

- त्रिविधं दुःखम्।
- दुःख-प्रतिघाते लौकिकोपायानामसामर्थ्यम्।
- दुःखात्यन्तिकनिवृत्तौ आनुश्रविकोपायस्य अकिंचित्करवत्वम्।
- दुःखनिवृत्तेः विवेकोपायसाध्यत्वम्।

अन्वितिः २. साङ्ख्यशास्त्रीयसिद्धान्ताः। **श्रेयोऽङ्कः १**

- त्रिविधप्रमाणम्।
- व्यक्ता-व्यक्त-ज्ञ-तत्त्वानि।
- तेषां साधर्म्यवैधर्म्यञ्च।
- सत्कार्यवादे मानानि।

अन्वितिः ३. प्रकृतिसिद्धिः तत्सम्भवागुणाश्च। **श्रेयोऽङ्कः १**

- साङ्ख्यदर्शने प्रकृतिः।
- प्रकृतेः अस्तित्वे मानानि।
- तदीयम् वैश्वरूपत्वम्
- गुणानां स्वरूपं, गुणक्षोभे तेषां वैशिष्ट्यम्।

अन्वितिः ४. पुरुषविवेचनम्। **श्रेयोऽङ्कः १**

- पुरुषस्य औपनिषदं स्वरूपम्।
- पुरुषस्य अस्तित्वे मानम्।
- पुरुषस्य अनेकत्वम्।
- पुरुषस्य प्रकृत्या सम्बन्धः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वाचस्पतिमिश्र, साङ्ख्यतत्त्वकौमुदी (व्याख्याकार: डॉ. ओमप्रकाश पाण्डेय), वाराणसी : चौखम्बा कृष्णदास अकादमी।

सहायकाः ग्रन्थाः (Additional Readings)

1. Keith, A. B., The Samkhya system: A history of the Samkhya philosophy. Varanasi: Motilal Banarsidass.
2. डॉ. बलदेव उपाध्याय, साङ्ख्यदर्शन: तत्त्वज्ञान का आधार, वाराणसी : चौखम्बा विद्याभवन।

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यशास्त्रस्य गम्भीरसिद्धान्तज्ञानम्।
2. पुरुषार्थविषयकोलब्धिः।
3. चेतनाचेतनविभागस्य शास्त्रीयबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यशास्त्रस्य सिद्धान्तान् विशदतया ज्ञातुं शक्नुयुः।
2. पुरुषार्थस्वरूपम् अवगत्य स्थूलसूक्ष्मशरीरयोः स्वरूपं भेदं च बोद्धुं समर्थाः भवेयुः।
3. प्रकृति-पुरुषयोः संयोगस्य तद्विभागस्य च वास्तविकं रहस्यं ज्ञातुम् अर्हाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	साङ्ख्यशास्त्रीयं विशिष्टाध्ययनम्	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पुरुषार्थः। **श्रेयोऽङ्कः १**

- भोगापवर्गयोः पुरुषार्थत्वम्।
- मोक्षस्य चरमपुरुषार्थत्वम्।
- करणानां पुरुषार्थाय प्रवृत्तिः।
- अन्तःकरणभेदाः तेषां कार्यं च।

अन्वितिः २. विशेषाविशेषशरीरविचारः। **श्रेयोऽङ्कः १**

- लिङ्गशरीरस्य अवयवाः।
- स्थूलसूक्ष्मशरीरयोः शान्तघोरमूढरूपता।
- लिङ्गस्य शरीरस्य संसरणं स्वरूपञ्च।
- विशेष(स्थूल)शरीरस्य अवान्तरभेदाः।

अन्वितिः ३. बुद्धिसर्गः (प्रत्ययसर्गः) **श्रेयोऽङ्कः १**

- बुद्धेः भावाः तेषां फलानि च।
- विपर्ययस्तद्भेदाश्च
- सभेदं अशक्तिविचारः।
- तुष्टिसिद्धीनां सविशेषविवरणम्।

अन्वितिः ४. चेतनाचेतनसंयोगः विभागश्च। **श्रेयोऽङ्कः १**

- चेतनकर्तृकोऽचेतनसंयोगः।
- अचेतननिष्ठः चेतनसंयोगः।
- विवेकज्ञानस्य हानोपायत्वम्।
- सप्तरूपविनिवृत्तायाः प्रकृतेः स्वरूपम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वाचस्पतिमिश्रः. (प्र.सं.). साङ्ख्यतत्त्वकौमुदी (कारिका 19–72). वाराणसी : चौखम्बा कृष्णदास अकाडमी।

सहायकाः ग्रन्थाः (Additional Readings)

1. वर्मा, पण्डित रामचन्द्र. (प्र.सं.). साङ्ख्ययोग के मूलतत्त्व. दिल्ली : नागप्रकाशन।
2. शर्मा, डॉ. भगवती प्रसाद. (प्र.सं.). साङ्ख्यसिद्धान्त और उनका वैज्ञानिक विश्लेषण. उत्तर प्रदेश हिन्दी संस्थान : भारतीय दर्शन परिषद्।

काठिन्यस्तरः 200-299	श्रेयोऽङ्काः - 4 होराः - 60

चतुर्थसत्रार्द्धः (SEMESTER – 4)

प्रधानः पाठ्यक्रमः (Major) 2.4: साङ्ख्ययोगः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पातञ्जलदर्शनस्य शास्त्रीयतत्त्वानां विशेषावबोधः।
2. वैश्विक ज्ञानक्षेत्राय योगतत्वात्मिकायाः भारतीयज्ञानमन्दाकिन्याः उपायनीकरणम्।
3. प्राच्यविद्यायाः प्रायोगिकरहस्य समुद्घाटनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. योगशास्त्रीयसूक्ष्मतत्त्वानां विशेषावबोधं प्राप्तुं समर्थाः भविष्यन्ति।
2. योगसाधने प्राणायामस्य, ध्यानस्य ईश्वरप्रणिधानस्य च रहस्यम् अवगन्तुं शक्ताः भविष्यन्ति।
3. क्रियायोगस्य तदुपकारस्य च अवगत्या व्यावहारिकजीवनेऽपि तल्लाभं प्राप्तुं योग्याः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.4	साङ्ख्ययोगः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. योगसाधने वैराग्यम्। **श्रेयोऽङ्कः १**

- अपरवैराग्यं तद्भेदाश्च।
- परवैराग्यम्।
- अपरवैराग्यफलम्।
- परवैराग्यसाध्यः निर्बीजयोगः।

अन्वितिः २. परिकर्माणि। **श्रेयोऽङ्कः १**

- मैत्र्यादीनां चित्तप्रसादनत्वसाधकत्वम्।
- प्राणायामः।

- मनसः स्थितिनिवन्धिनी प्रवृत्तिः।
- ध्यानम्।

अन्वितिः ३. ईश्वरानुशीलनम्। **श्रेयोऽङ्कः १**

- ईश्वरप्रणिधानम्।
- ईश्वरस्य लक्षणं स्वरूपञ्च।
- प्रणवविचारः।
- ईश्वरानुग्रहस्य आसन्नतमयोगफल प्रापकत्वम्।

अन्वितिः ४. क्रियायोगः तत्फलञ्च। **श्रेयोऽङ्कः १**

- क्रियायोगस्य स्वरूपम्।
- क्लेशाः तेषां तनूकरणोपायश्च।
- अविद्याया क्लेशमूलत्वम्।
- अविद्यालक्षणपरिष्कारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वाचस्पतिमिश्रः. (प्र.सं.). तत्त्ववैशारदी-टीकोपेतं योगसूत्रम्. वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. शास्त्री, डॉ. शिवकुमार. (प्र.सं.). योगदर्शन: भारतीय संस्कृति का आधार. वाराणसी : चौखम्बा ओरिएण्टालिया।
2. उपाध्याय, प्रो. रामजी. (प्र.सं.). योगशास्त्रविमर्शः. वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
3. Eliade, M. (प्र.सं.). Yoga: Immortality and Freedom. Princeton University Press.

काठिन्यस्तरः
200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.5: योगजविभूतिविमर्शः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगसाधनजन्यविभूतीनामवबोधः।
2. भारतीयसंस्कृतौ योगिनां महर्षीणाञ्च अलौकिकसिद्धीनां विभूतीनां च रहस्योद्घाटनम्।
3. प्राचीनभारतीययोगसम्पत्तेः प्रतिपत्तिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मनसः एकाग्रतायाः चरमं फलं ज्ञातुं समर्थाः भविष्यन्ति।
2. योगजविभूतीः तासां सिद्धेः उपायं च बोद्धुं शक्ताः भविष्यन्ति।
3. भारतीयपरम्परायां साधनानि तेषां सिद्धीश्च अवगत्य तन्महत्त्वं ज्ञातुं भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.5	योगजविभूतिविमर्शः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. परिणामाः। **श्रेयोऽङ्कः १**

- एकाग्रतास्वरूपं तत्परिणामश्च।
- समाधि-परिणामः।
- निरोधसंज्ञाविधानं तस्य परिणामश्च।
- भूतेन्द्रियाणां धर्म-लक्षणावस्थापरिणामाः।

अन्वितिः २. विशिष्टाः विभूतयः। **श्रेयोऽङ्कः १**

- भुवनज्ञानसिद्धिः।
- सर्वभूतरूतज्ञानम्।
- सर्वाधिष्टातृत्वं, सर्वज्ञातृत्वं च।
- अरिष्टज्ञानम्।

- भूतजयः।
- प्रधानजयः।
- अणिमादिप्रादुर्भावः।
- विवेकजं ज्ञानम्।

अन्वितिः ३. अन्याः योगजाः विभूतयः। **श्रेयोऽङ्कः १**

- अन्तर्धानसिद्धिः।
- बलादिलाभः।
- कायव्यूहज्ञानम्।
- क्षुत्पिपासानिवृत्तिः।
- पुरुषज्ञानम्।
- पर-शरीरावेशः।
- दिव्यं श्रोत्रम्।
- आकाशगमनम्।
- महाविदेहसिद्धिः।

अन्वितिः ४. सिद्धौ अन्तरायाः। **श्रेयोऽङ्कः १**

- पञ्चसिद्धयः।
- सिद्धीनां प्रकरणात् अनिष्टप्रसङ्गः।
- स्थान्युपनिमन्त्रणे – अनिष्टम्।
- सत्व-पुरुषशुद्धिसाम्ये अन्तरायनिवृत्तिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. व्यासभाष्योपेतं योगसूत्रम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. योगविवेकदीपिका, ऋषिकेश : कैलाश आश्रम।
2. डा. प्रभाकर मिश्रः, योगदर्शन: तुलनात्मक अध्ययन, वाराणसी : विद्याभवन प्रकाशन।
3. Tigunait, P. R., Yoga Darshana: Vision of the seers. Himalayan Institute Press.

काठिन्यस्तरः 200-299

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.6: भगवद्गीतायां साङ्ख्ययोगः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. उपनिषदां साररूपस्य गीताशास्त्रस्य अध्ययनम्।
2. भगवद्गीताप्रचोदितमार्गेण आत्मव्यक्तित्वसंघटनम्।
3. भगवद्गीतोक्त-योगस्य ज्ञानं तस्य स्वजीवने प्रयोगश्च।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भगवद्गीतोक्तं ध्यानयोगस्य रहस्यमवगन्तुं समर्थाः भवेयुः।
2. क्षेत्र-क्षेत्रज्ञतत्त्वमधिगत्य गुणत्रयस्य कार्यं गुणातीतस्वरूपञ्च बोद्धुं समर्थाः भविष्यन्ति।
3. स्थितप्रज्ञस्य लक्षणं परिज्ञाय ब्राह्मीं स्थितिमपि परिचेतुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.6	भगवद्गीतायां साङ्ख्ययोगः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. षष्ठाध्यायः – ध्यानयोगः। **श्रेयोऽङ्कः १**

- योगभेदाः।
- योगारूढ लक्षणानि।
- अभ्यास-वैराग्ययोः योगसाधकत्वम्।
- योगभ्रष्टस्य गतिः।

अन्वितिः २. त्रयोदशाध्यायः – क्षेत्रक्षेत्रज्ञविवेचनम्। **श्रेयोऽङ्कः १**

- क्षेत्रविचारः।
- ज्ञानस्वरूपम्।
- ज्ञेयविचारः।

- त्र्यज्ञनिरूपणम्।

अन्वितिः ३. चतुर्दशाध्यायः – गुणत्रयविभागयोगः। **श्रेयोऽङ्कः १**

- सत्त्वगुणस्य स्वरूपम्।
- रजोगुणस्य कार्य्यं स्वरूपञ्च।
- तमोगुणस्य क्रियान्वयनम्।

अन्वितिः ३. चतुर्दशाध्यायः – गुणत्रयविभागयोगः। **श्रेयोऽङ्कः १**

- गुणातीतस्य लक्षणं कार्य्यञ्च।
- गीतोक्तस्य साङ्ख्ययोगस्य ज्ञानयोगापरपर्य्यायित्वम्।
- स्थितप्रज्ञस्य लक्षणम्।
- ज्ञानिनः प्रत्यवायाः।
- ब्राह्मी स्थितिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मधुसूदन सरस्वती, श्रीमद्भगवद्गीताः गूढार्थदीपिकाटीका, वाराणसी : चौखम्बा संस्कृत भवन; दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान।

सहायकाः ग्रन्थाः (Additional Readings)

1. तिवारी, प्रो. रामचन्द्र, गीतातत्त्वविन्यासः, नागपुर : कविकुलगुरु-कालिदास संस्कृत विश्वविद्यालय।
2. रावत, डा. नीलिमा, श्रीमद्भगवद्गीतायाः योगदर्शनसम्बन्धः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
3. मिश्रः, प्रो. उमेश, गीताशास्त्रीयतत्त्वविमर्शः, केन्द्रीय संस्कृत विश्वविद्यालय।
4. डा. के. एन. उपाध्यायः, गीतायाः साङ्ख्ययोगविमर्शः, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।
5. लोकमान्य बालगङ्गाधरतिलक, गीता रहस्य, पुणे : केशवालय प्रकाशन।
6. शर्मा, डा. श्रीकान्त, गीतातत्त्वनिरूपणम्, नई दिल्ली : राष्ट्रिय संस्कृत संस्थानम्।
7. मिश्र, डा. गोपाल चन्द्र, श्रीमद्भगवद्गीता में तात्त्विक चिन्तन, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

तृतीयवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

पञ्चमसत्रार्द्धः (SEMESTER – 5)

प्रधानः पाठ्यक्रमः (Major) 3.1: कैवल्यविमर्शः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगशास्त्रस्य आत्यन्तिकं लक्ष्यभूतं कैवल्यमध्येतव्यम्।
2. मानवजीवनस्य आत्यन्तिक-प्राप्तव्यविषयकस्य ज्ञानस्योपलब्धिः।
3. कैवल्यस्वरूपावगत्या योगदर्शनस्य कृत्स्नज्ञानं सम्पद्येत।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अध्येतारः योगदर्शनमधिकृत्य कृत्स्नं ज्ञानं लभेरन्।
2. सैद्धान्तिकं ज्ञानं अन्ततोगत्वा शास्त्रीयज्ञानस्य (पूर्व-परपक्षामाध्यमेन) छात्रैः उपकल्प्येत।
3. छात्राणां कैवल्य-विषयज्ञानस्य परिवर्द्धनं स्यात्।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.1	कैवल्यविमर्शः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. जात्यन्तरपरिणामः। **श्रेयोऽङ्कः १**

- जात्यन्तरपरिणामे हेतुः।
- निर्माणचित्तम्।
- अनाशयं चित्तम्।

अन्वितिः २. योगिनः कर्म नैर्पुण्यम्। **श्रेयोऽङ्कः १**

- कर्मणः चातुर्विध्यम्।
- योगिकर्मणः अशुक्लकृष्णत्वम्।
- वासनानुगुणा कर्माभिव्यक्तिः।
- वासनानाम् अनादित्वम् तत्संग्रहविधिश्च।

अन्वितिः ३. स्मृति-संस्कारयोः एकरूपता। **श्रेयोऽङ्कः १**

- स्मृति-संस्कारयो एकत्वम्।
- अतीतानागतमपि कर्म सद्रूपम्।
- सर्ववस्तुनः एकरूपत्वम्।
- चित्तान्तरपरिग्रहे विज्ञानवादनिरासः।

अन्वितिः ४. कैवल्यम्। **श्रेयोऽङ्कः १**

- स्वबुद्धि-सम्वेदनम्।
- विशेषदर्शिनः आत्मभावभावना।
- कैवल्यप्राग्भारं चित्तम्।
- धर्ममेघ समाधिः।
- क्लेशकर्मनिवृत्तिः।
- कृतार्थानां परिणामक्रमसमाप्तिः।
- स्वरूपप्रतिष्ठा।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. वाचस्पतिमिश्रः, तत्त्ववैशारदी-टीकोपेतं योगसूत्रम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. युक्तेश्वर गिरि, कैवल्यदर्शनम्, Yogada Satsanga Society of India.
2. स्वामी सत्यपति परिव्राजक, योगदर्शनम्, साबरकांठा, गुजरात: दर्शन योग महाविद्यालय, आर्यवन, रोजड।
3. डा. वसीम खान, भारतीय दर्शन में समाधि परम्परा, साहित्यागार।

काठिन्यस्तरः 300-399	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.2: विवेकज्ञानविस्तारः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. समस्याजर्जरिते समाजे समस्यानां समाधानबीजत्वेन विवेकज्ञानस्योपलब्धिः।
2. भारतीयज्ञानसंवहिन्यां विवेकवत्याः प्रवृत्तेःमहत्त्वप्रगीतिः।
3. सैद्धान्तिकदृष्ट्या साङ्ख्यज्ञानस्य सर्वातिशायित्वनिर्वचनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आत्मसमस्यासमाधाने अध्येतारः अर्हाः स्युः।
2. साङ्ख्यशास्त्रीय विवेकज्ञानस्य अवगाहने शास्त्रान्तरीय-बोधविषये च प्रवृत्तिं भजेरन् छात्राः।
3. साङ्ख्यशास्त्रीयशोधविषयिणी समीहाऽपि अध्येतॄणां संजायेत।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.2	विवेकज्ञानविस्तारः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. विवेकज्ञानस्य मोक्षहेतुत्वम्। **श्रेयोऽङ्कः १**

- अविवेकविचारः।
- प्रकृति-पुरुषसंयोगः
- आत्मज्ञानस्य अविवेकप्रतिबन्धकत्वम्।

अन्वितिः २. प्रकृत्यादिनिरूपणम्। **श्रेयोऽङ्कः १**

- प्रकृतेः संज्ञा, पर्यायाः स्वरूपञ्च।
- महत्त्वनिरूपणम्।
- अहङ्कारः।
- इन्द्रियाणि।

- स्थूलशरीरोत्पत्तिः।

अन्वितिः ३. प्रकृत्यादिभ्यः विविक्तत्वं पुरुषस्य। **श्रेयोऽङ्कः १**

- पुरुषसंज्ञाविधानम्।
- पुरुषस्य पर्य्यायाः तस्य नित्यशुद्ध्यादिमत्त्वम्।
- आत्मानात्मनोः स्वरूपपरिच्छितिः।

अन्वितिः ४. आत्मानात्मनोः सत्यत्वासत्यत्व-वैधर्म्यविचारः। **श्रेयोऽङ्कः १**

- आत्मनः अविकार्य्यं अनात्मनः विकार्यञ्च।
- जगत्प्रपञ्चस्य स्वप्नाभत्वम्।
- प्रपञ्चस्य आविर्भावतिरोभावौ।
- पुरुषस्य नामरूपादिविनिर्मुक्तत्वम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. विज्ञानभिक्षुः, साङ्ख्यसारः (पूर्वभागः सम्पूर्णः, उत्तरभागः द्वितीयपरिच्छेदान्तः) (व्याख्याकारः: रमाशंकर भट्टाचार्यः), वाराणसी : भारतीय विद्या प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. डॉ. राधाकृष्णन् शर्मा,. साङ्ख्यदर्शनः : तत्त्वमीमांसा और इतिहास, दिल्ली : मोतीलाल बनारसीदास प्रकाशन।
2. डॉ. भगवती प्रसाद शर्मा, साङ्ख्यसिद्धान्त और उनका वैज्ञानिक विश्लेषण, उत्तर प्रदेश हिन्दी संस्थान : भारतीय दर्शन परिषद्।
3. डॉ. कमलेश पाण्ड्ये, साङ्ख्यदर्शन और तत्त्वचिन्तन, वाराणसी : विश्वविद्यालय प्रकाशन।
4. Chakravarti, P. The Original Samkhya System of Kapila. Poona: Oriental Book Agency. (Reprint: Kessinger Publishing.)

काठिन्यस्तरः 300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.3: हठयोगप्रवेशः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. राजयोगं अधीयानाः हठयोगमपि भारतीयज्ञानपरम्परायाः शाखात्वेन जानीयुः।
2. साङ्ख्यशास्त्रीयस्य ज्ञानस्य कदाचिद् प्रायोगिकी सिद्धिः आनुष्ठानिकेन हठयोगेन भवतीति तद्विज्ञप्तिः अवश्यम्भाविनी।
3. योगशास्त्रस्य प्रचाराय प्रायोगिकः पक्षः सदैव अपेक्षणीयः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. व्यक्तिगते स्तरेऽपि स्वास्थ्यलाभाय अस्य प्रयोगं कर्तुं समर्थाः भविष्यन्ति।
2. प्रायोगिकयोगसाधनमाध्यमेन व्यक्तित्वञ्च संवर्द्धेयुः।
3. पाश्चात्त्यस्तरीयैः योगैः प्राच्यपरम्परायां प्रसिद्धानां योगासन-प्राणायामानां तुलनात्मकमध्ययनं कर्तुं समर्थाः भवेयुः।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.3	हठयोगप्रवेशः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. आसननिरूपणम्। **श्रेयोऽङ्कः १**

- हठयोगस्य लक्षणम्।
- मठस्य लक्षणम्।
- मुख्यानि आसनानि।
- आसनानां दृष्टादृष्टलाभः।

अन्वितिः २. प्राणायाम्। **श्रेयोऽङ्कः १**

- मन्द-मध्योत्तमप्राणायाम्भेदाः।
- षट् कर्माणि।

- कुम्भकप्रकाराः।
- नाडीशुद्धेः लक्षणं फलञ्च।

अन्वितिः ३. कुण्डलिन्याः अवबोधः। **श्रेयोऽङ्कः १**

- कुण्डलिनीस्वरूपम्।
- मुद्राऽभ्यासः।
- बन्धसाधनाभ्यासः।
- कुण्डलिनी जागरणं तत्फलं च।

अन्वितिः ४. नादानुसन्धानम्। **श्रेयोऽङ्कः १**

- अनाहतनादस्वरूपम्।
- नादसाधने प्रारम्भावस्था।
- नादसाधने घट-परिचयावस्थाविचारः।
- नादसाधने निष्पत्त्यवस्था तत्फलञ्च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. आत्मारामुनिः, हठयोगप्रदीपिका, वाराणसी: चौखम्बा प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. दिगम्बरानन्द, स्वामी. (प्र.सं.). हठयोगप्रदीपिका (टीका), रामकृष्ण मठ प्रकाशन।
2. गोरखनाथ, गुरु. (प्र.सं.). गोरक्षसंहिता, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
3. (प्र.सं.). शिवसंहिता, वाराणसी : चौखम्बा विद्याभवन।
4. पूर्णानन्द स्वामी, पण्डित. (प्र.सं.). षट्चक्रनिरूपणम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

काठिन्यस्तरः 300-399

श्रेयोऽङ्काः - 4
होराः - 60

षष्ठसत्रार्द्धः (SEMESTER – 6)

प्रधानः पाठ्यक्रमः (Major) 3.4: श्रीमद्भागवते साङ्ख्ययोगः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. श्रीमद्भागवतोक्तसाङ्ख्ययोगदर्शनस्य अवबोधः।
2. श्रीमद्भागवतोक्तसाङ्ख्ययोगसिद्धान्ते स्वातन्त्र्यस्य ज्ञानम्।
3. श्रीमद्भागवतोक्तयोगस्य प्रायोगिकतापरिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. श्रीमद्भागवतमहापुराणेन सह साङ्ख्ययोगदर्शनस्य सम्बन्धं ज्ञातुं शक्नुयुः।
2. श्रीमद्भागवतोक्तं योगं जानन्तः तस्य प्रायोगिकमुपयोगं कर्तुं प्रभवेयुः।
3. श्रीमद्भागवतोक्तस्य साङ्ख्ययोगस्य वैशिष्ट्यं ज्ञातुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.4	श्रीमद्भागवते साङ्ख्ययोगः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. श्रीमद्भागवते कापिलं सारव्यम्। **श्रेयोऽङ्कः १**

- भगवदवतारः महर्षिकपिलः।
- कपिलोपदिष्टानि तत्त्वानि।
- साङ्ख्याभिमता सृष्टिप्रक्रिया।
- जीवगतिः कैवल्यं च।
- सेश्वरं सांरव्यम्।

अन्वितिः २. श्रीमद्भागवते योगतत्त्वम्। **श्रेयोऽङ्कः १**

- महर्षिकपिलोपदिष्टो ध्यानविधिः योगाङ्गानि च।

- भगवता उद्धवाय उपदिष्टानि योगसाधनानि।
- योगविभूतयः।
- भागवत-पातञ्जल-योगयोः समीक्षणम्।

अन्वितिः ३. श्रीमद्भागवते योगवैविध्यम्। **श्रेयोऽङ्कः १**

- श्रीमद्भागवते कर्मयोगः।
- ज्ञानयोगः।
- भक्तियोगः।
- योगाधिकारिणः।

अन्वितिः ४. श्रीमद्भागवतोक्त -योगस्य प्रासङ्गिकता। **श्रेयोऽङ्कः १**

- कर्मयोगस्य स्वरूपं व्यावहारिकता च।
- ध्यानयोगस्य प्रासङ्गिकता।
- भक्तियोगस्य सौलभ्यं परमोपादेयत्वं च।
- श्रीमद्भागवतोक्त-साङ्ख्ययोगयोः स्वातन्त्र्यम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीमद्भागवतमहापुराणम् – भावार्थदीपिका-टीकासहित।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीमद्भागवतमहापुराणम् (हिन्दी व्याख्यासहित), गोरखपुर : गीताप्रेस।
2. त्रिपाठी, श्रीकृष्णमणि, (प्र.सं.), पुराणेतिहासयोः साङ्ख्ययोगविमर्शः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

काठिन्यस्तरः 300-399	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.5: उपनिषत्सु साङ्ख्ययोगः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यदर्शनस्य योगदर्शनस्य च वैदिकदर्शनत्वात् श्रुतिरूपाणामुपनिषदां तयोः आधारत्वेन उपलब्धिः।
2. भारतीयज्ञानपरम्परायाः मूलं भगवती श्रुतिः इति सत्यस्याविष्करणम्।
3. अद्यतने समाजे प्राच्य-पाश्चात्त्ययोगविदां मौलिकाश्रयरूपा उपनिषदः इति तथ्योपलब्धिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अध्येतारः साङ्ख्ययोगदर्शनयोः बीजत्वेन उपनिषदः जानीयुः।
2. प्राच्यपाश्चात्त्यवर्गस्य मूलं भारतीयज्ञानमिति ज्ञात्वा भारतीयज्ञानं प्रति समाकर्षिताः भवेयुः।
3. साङ्ख्य-योगशास्त्रमधिकृत्य शोधक्षेत्रीयां प्रस्तुतिमपि संसाधयिष्यन्ति।
4. छात्राः उपनिषद्वर्णित-विविधयोगसम्वन्धिज्ञानेन पूर्णतां लभेरन्।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.5	उपनिषत्सु साङ्ख्ययोगः	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. श्वेताश्वेतरोपनिषदि साङ्ख्ययोगः। **श्रेयोऽङ्कः १**

- हठयोगस्य लक्षणम्।
- मठस्य लक्षणम्।
- मुख्यानि आसनानि।
- आसनानां दृष्टादृष्टलाभः।

अन्वितिः २. माण्डुकोपनिषदि आत्मज्ञानम्। **श्रेयोऽङ्कः १**

- आत्मानात्मनोः भेदाः।
- अनात्मजिहासा।
- आत्मज्ञाने प्रयोजकानि।

- बन्धमोक्षविचारः।

अन्वितिः ३. शाण्डिल्योपनिषदः परिचयः। **श्रेयोऽङ्कः १**

- आत्मनः नित्यशुद्धादिस्वरूपम्।
- मोक्षस्य ज्ञानैक-साध्यत्वम्।
- आत्मज्ञानस्य संग्रहणीयः पक्षः।

अन्वितिः ४. विविधयोगसम्बधिन्यः उपनिषदः। **श्रेयोऽङ्कः १**

- योगतत्त्वोपनिषत्परिचयः।
- योगचूडामणि इति उपनिषदि हठयोगः।
- योगशिखा-उपनिषदः सारः।
- योगविन्दु उपनिषदि योगशास्त्रीयाध्यात्मचर्चा।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शर्मा, रमेश दत्त. (प्र.सं.). 108 उपनिषद्. चौखम्बा कृष्णदास अकादमी, वाराणसी।
2. उपनिषत्संग्रहः, Oriental Institute, Baroda.

सहायकाः ग्रन्थाः (Additional Readings)

1. वेदी, रामनाथ. (प्र.सं.). उपनिषत्सु योगदर्शनम्, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
2. मिश्र, कृष्णकान्त. (प्र.सं.). योगमार्गः उपनिषत्सु, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।
3. शास्त्री, सत्यव्रत. (प्र.सं.). ब्रह्मविद्यायां योगः, नई दिल्ली : राष्ट्रीय संस्कृत संस्थान।

काठिन्यस्तरः
300-399

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 3.6: प्रायोगिकं योगदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पातञ्जलशास्त्रस्य प्रायोगिकपक्षस्योपलब्धिः।
2. व्यवहारिकशास्त्रत्वेन मानवीयोपकारकविद्यात्वेन च योगशास्त्रस्य प्रशस्तिः।
3. योगसम्बद्धानां प्रयोगविद्यानां वैज्ञानिकतायाः चिकित्साशास्त्रीयतायाश्चाविष्कृतिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्रायोगिक-योगमाध्यमेन शारीरिकसुस्थतायाः प्राप्तये यतमानाः भविष्यन्ति।
2. नित्यनूतनतया योगशास्त्रमधिकृत्य शोधकार्येण विविधसाफल्यमधिगन्तुं समर्थाः भवेयुः।
3. योगशास्त्रस्य मानसिक-शैक्षणिक-सामाजिक-समुन्नतिबोधकपक्षस्य समाविष्करणेन अध्येतारः अपि साफल्यं लभेरन्।
4. योगशास्त्रस्य प्रयोग एव तस्य वैज्ञानिकपद्धतिं परिप्रापयिष्यति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 3.6	प्रायोगिकं योगदर्शनम्	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. योगासनानां प्रायोगिकता सूर्यनमस्कारः, आसनानि। **श्रेयोऽङ्कः १**

- सूर्यनमस्कारः।
- नौकासनम्, पवनमुक्तासनम्, उत्थानपादासनम्।
- पादवृत्तासनम्, चक्रिकासनम्, अर्धहलासनम्, हलासनम्।
- सेतुबन्धासनम्, सर्वाङ्गासनम्, मत्स्यासनम्, चक्रासनम्, शवासनम्।

अन्वितिः २. प्राणायामः , नाडीशोधनम्। **श्रेयोऽङ्कः १**

- अन्यतर-नासापुटेन श्वासोच्छ्वासः।
- नाडीशोधनम् (अन्यतर नासापुटेन श्वासो च्छ्वासः)

- नाडीशोधनम् (अन्यतर नासापुटेन श्वासोच्छवासः) आन्तरकुम्भकश्च।
- नाडीशोधनम् (पूरकः आन्तरकुम्भकः रेचकः बाह्यकुम्भकः)

अन्वितिः ३. अवसादापनोदने योगः (सैद्धान्तिकम्) **श्रेयोऽङ्कः १**

- अभ्यास-वैराग्याभ्यां मनसः स्थितिनिबन्धनम्।
- क्रियायोगेन मनसः स्थैर्य्यसम्पादनम्।
- मैत्र्यादिसाधनेन अवसादस्यापनोदनम्।
- धारणासिद्धौ चित्तप्रसादनम्।

